# A-I/1/22AJDS1CCTC1/23

## प्रथमसत्रार्द्धः

## प्रथमपत्रम् (DSCC-16)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. जैनमते प्रमाणस्य प्रामाण्यं किम्?
2. सांख्यदर्शने किं प्रमाणलक्षणम्?
3. समन्तभद्राचार्यकृतप्रमाणलक्षणं किम्?
4. 'ज्ञातृव्यापारः प्रमाणम्' कोऽभिप्रायः अस्य?
5. जैनमते प्रमाणस्य प्रामाण्यं स्वतः वा परतो वा?
6. हेमचन्द्राचार्यकृतन्यायग्रन्थस्य नाम किम्?
7. आप्तपरीक्षाग्रन्थस्य कर्ता कः?
8. जरन्नैयायिकानां मते किं प्रमाणलक्षणम्?
9. परीक्षामुखसूत्रे प्रमाणलक्षणं किम्?
10. 'प्रमाणनयैरधिगमः' अस्य सूत्रस्य कः अर्थः?
11. जैनमते कतिविधं प्रमाणं स्वीकृतम्? नामान्यपि लिखत।
12. सन्निकर्षस्य प्रमाणत्वं केषां मते स्वीकृतम्?
13. जैनदर्शनस्य चतुर्णां न्यायग्रन्थानां नामानि लिखत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रमाणस्य प्रामाण्यविचारः जैनमतदृष्ट्या कुरुत।
15. सन्निकर्षस्य प्रमाणत्वस्य गुणदोषविचारः कर्तव्यः?
16. जैनन्यायस्य किं वैशिष्ट्यम्?

17. जैननैयायिकस्य समन्तभद्राचार्यस्य कृतित्वं वर्णयत।

18. 'तत्प्रामाण्यं स्वतः परतश्च' सूत्रं विशदयत।

19. चार्वाकमतस्य भूतचैतन्यवादस्य निरसनं कुरुत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'जैनप्रमाणमीमांसा' इति विषयमधिकृत्य निबन्धः लेखनीयः।

21. 'सम्यग्ज्ञानं प्रमाणम्' इति विस्तरेण वर्णयत।

22. 'ज्ञानं ज्ञानान्तरवेद्यं प्रमेयत्वात् पटादिवत्' अस्य नैयायिकमतस्य निरसनं कुरुत।

# A-I/2/22AJDS1CCTC2/23

## प्रथमसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-17)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. किं द्रव्यम्?
2. जैनाभिमतद्रव्याणां नामानि लिखत।
3. कः अस्तिकायः?
4. जीवद्रव्यस्य लक्षणं किम्?
5. जीवः कदा सिद्धः भवति?
6. उपयोगस्य कति भेदाः सन्ति? नामान्यपि लिखत।
7. पुद्गलस्य लक्षणं किम्?
8. कः परमाणुः?
9. शब्दानां परिगणना कस्मिन् द्रव्ये भवति?
10. आकाशद्रव्यस्य लक्षणं किम्?
11. कालद्रव्यं किम्?
12. ध्रौव्यत्वं नाम किम्?
13. धर्मद्रव्यस्य सोदाहरणं लक्षणं लिखत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. सिद्धजीवस्य विशदं वर्णनं कुरुत।
15. पुद्गलद्रव्यं वर्णयत।

16. धर्माधर्मद्रव्ययोः सोदाहरणं संक्षेपेण वर्णनं कुरुत।
17. द्रव्येषु मूर्तामूर्तत्वविचारः करणीयः।
18. कालद्रव्यस्य आकाशद्रव्यस्य च स्वरूपं लिखत।
19. ज्ञानोपयोगं विशदयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'जीवद्रव्यम्' इति विषयमधिकृत्य निबन्धं लिखत।
21. 'गुणपर्ययवद् द्रव्यम्' इति सूत्रं विशदयत।
22. द्रव्याणाम् अस्तिकायत्वम् अनस्तिकायत्वञ्च वर्णयत।

# A-I/3/22AJDS1CCTC3/23

## प्रथमसत्रार्द्धः

## तृतीयपत्रम् (DSCC-18)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. किं सम्यग्ज्ञानम्?
2. ज्ञानस्य भेदानां नामानि लिखत।
3. किं मतिज्ञानम्?
4. अवधिज्ञानस्य लक्षणं किम्?
5. केवलज्ञानस्य का परिभाषा?
6. त्रयाणां कुज्ञानानां नामानि लिखत।
7. तत्त्वार्थश्लोकवार्तिकग्रन्थदिशा श्रुतज्ञानस्य लक्षणं लिखत।
8. 'ज्ञानशब्दस्य सम्बन्धः प्रत्येकं भुजिवन्मतः' अस्य वाक्यांशस्य अर्थः कः?
9. मतिज्ञाने श्रुतज्ञाने च कः भेदः?
10. 'आदा णाण पमाणं' अस्य कः अर्थः?
11. आभिनिबोधिकज्ञानस्य अपरं नाम किम्?
12. अवधिज्ञानस्य भेदाः के सन्ति?
13. धारणामतिज्ञानं किं भवति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. इन्द्रियज्ञानं कथं निर्मलं न भवति?
15. केवलज्ञानस्य महत्त्वं वर्णयत।

16. ज्ञानस्य सम्यक्त्वं मिथ्यात्वञ्च वर्णयत।

17. 'मतिश्रुतावधिमनः पर्ययकेवलानि' अस्य सूत्रस्य तत्त्वार्थश्लोकवार्तिकग्रन्थदिशा व्याख्या कर्तव्या।

18. ज्ञानमीमांसादिशा उपयोगस्य वर्णनं कुरुत।

19. 'आत्मा ज्ञानप्रमाणम्' कथम्?

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. मोक्षमार्गे ज्ञानस्य किं वैशिष्ट्यम्?

21. नन्दीसूत्रानुसारं ज्ञानपञ्चकं विवेचयत।

22. जीवे ज्ञाने च कथं भेदः अभेदो वा? इति विस्तरेण विशदयत।

# A-I/4/22AJDS1CCTC4/23

**प्रथमसत्रार्द्धः**

**चतुर्थपत्रम् (DSCC-19)**

**जैनदर्शनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. णमोकारमन्त्रं शुद्धभाषया लिखत।
2. चत्वारि मङ्गलानि कानि सन्ति?
3. आचार्यः कः भवति?
4. 'संसारसायरमणंतं' अस्यार्थः कः?
5. पाठ्यग्रन्थदिशा जिनशासनस्य मूलं ध्येयं किम्?
6. किं प्रमाणम्?
7. श्रमणः कः भवति?
8. व्रती कः भवति?
9. कः परिग्रहः?
10. हिंसायाः किं लक्षणम्?
11. के बाह्यपरिग्रहाः सन्ति?
12. द्वादशतपांसि कानि सन्ति?
13. 'खयकरणं सव्वदुक्खाणं' अस्यार्थं लिखत।

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पाठ्यग्रन्थदिशा संघस्य धारणा औचित्यञ्च स्पष्टयत।
15. गुरुकुलवासस्य के लाभाः सन्ति?

16. इन्द्रियविषयेषु कथं सुखं नास्ति ?

17. साधोः प्रमुखकर्तव्यानि वर्णयत।

18. अचौर्यव्रतं वर्णयत।

19. निश्चयव्यवहारनयौ वर्णयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. पञ्चमहाव्रतानि विस्तरेण वर्णयत।

21. परिग्रहं विस्तरेण वर्णयत।

22. प्रमाणनयविवेचनं कुरुत।